Orissan Oriental Text Series (Sanskrit) — 25

# BHṚṄGADŪTAM

By

Chakrapāṇi

उत्कलीय-प्राच्य-ग्रन्थमाला ( संस्कृतम् ) — २५

कविचक्रपाणिविरचितं

# भृङ्गदूतम्

सम्पादनम्

डक्टर भगवान् पण्डा

सम्पादकः

ओड़िशाराज्य-संस्कृतिविभाग-निर्द्देशालय,

भुवनेश्वरस्य ।

प्रकाशक :
ओड़िशाराज्य-संस्कृतिनिर्देशालयः
भुवनेश्वरम् - ७५१०१४

प्रथम-मुद्रणम्
१९९५

राजाबगिचा
श्रीअरविन्दप्रिण्टर्स मुद्रणालये
मुद्रितम्

मूल्यम् — रु० ११-०० (एकादशरूप्यकाणि)

Orissan Oriental Text Series (Sanskrit) — 25

# BHṚṄGADŪTAṂ

by

Chakrapāṇi

Edited by

**Dr. Bhagaban Panda**

Editor

Directorate of Culture, Orissa, Bhubaneswar

Publishd by
**Directorate of Culture, Orissa,**
**Bhubaneswar - 751014**

**First Edition**
**1995**

Printed at
**Sri Aravinda Printers,**
**Rajabagicha, Cuttack - 753 009**

**Price — Rs. 11-00 (Rupees Eleven only)**

# ॥ भृङ्गदूतम् ॥

# Introduction

The edition of Bhṛṅgadūtaṃ is based on a single manuscript preserved in the manuscript library of the Orissa State Museum, Bhubaneswar.

This is a palmleaf manuscript under Catalogue No. L/502-B and contains 77 folia in all. The size of the manuscript is 32.00 × 3.5 C. M. There are four lines in each folia and the lines contain 36 to 66 alphabets in Oriya characters. The manuscript includes the works namely Uddhavadūta (16 folia) from 1 to 16 folia, Meghadūta (8 verses only) from 17 to 18 folia, Bhṛṅgadūta (13 folia) from 19 to 31 folia and Haribhaktisarvasva Śataka (46 folia) from 32 to 77 folia. The manuscript has been collected from Golak Bihari Jenā, Orakalā, kuhā in the district of Khurda on 24-5-1970. It contains the following colophon—

इति श्रीमहेश्वरनायकपुत्रश्चक्रपाणिः ।
श्रीजगन्नाथमहाप्रभुङ्क श्रीचरणे शरणं मम ।

अरक्षितचक्रपाणिनायकः । श्रीराम ।

स्वस्ति श्रीगोपीनाथदेवनृपतेः चतुर्थेऽङ्के कार्त्तिकमासे शुक्ले पक्षे वृहस्पतिवासरे पञ्चम्यां [दशम्यां] तिथौ मीन [तुला] राशौ स्थिते भास्करे धनु [वृश्चिक] राशौ स्थिते चन्द्रमसि एवं पुस्तकं लिखितं गोलोरागड़ ओड़शम : गाँ ... ... ।

**Author of the work—**

The name of the author of Bhṛṅgadūta is not mentioned anywhere in the work. It is known from the above mentioned colophon that Chakrapāṇi Nāyak, the son of Maheśvara Nāyak of the village Goloragada has completed the writing of the manuscript of Bhṛṅgadūta on Thursday, the fifth bright half of the month of Kārttika in the fourth regnal year of the king Gopīnātha Deva (1720-1727 A. D.) who has been identified with the king of Bhoi dynasty of the then Khurda Kingdom of Orissa. According to the calculation the fourth regnal year of the king Gopīnātha

Deva was in vogue from 23-8-1721 to 11-9-1722 A. D.[1] The fifth bright half of Kārttiaa as per the Indian Ephemeris falls on Saturday of 14-10-1721 A. D. If the week day is accepted as the Thursday then the Tithi will be tenth bright half of Kārttika and the date will be 19-10-1721 A. D.[2] However the date of completion of writing of the manuscript may tentatively be fixed on the later date as mentioned above considering wrong mention of the Tithi as a scribal error.

It is known that the poet Chakrapāṇi Dāsa was the author of Bhṛṅgadūta though no direct or indirect evidence is available in this regard. In Orissa there were five poets known by name as Chakrapāṇi, Chakrapāṇi Kavichakravartī, Chakrapāṇi Bhañja, Chakrapāṇi Pattanāyak and Chakrapāṇi Dāsa. Among them the poet Chakrapāṇi, a little known writer, has composed the Pādapadma-Sudhānidhi, Chautisā and Chaupadī songs in Oriya language.[3] Kavichakravartī Chakrapāṇi and Chakrapāṇi Bhañja were also Oriya poets who have written the works namely Rāga Chaupadī and Chaupadī songs respectively. But others were Sanskrit poets of Orissa.

The poet Chakrapāṇi Pattanāyak (1750-1800 A. D) was the illustrious son of the famous poet Brajasundara Pattanāyak (1728-1776 A. D.), who was well known for his works Sulochanāmādhava-mahākāvya in Sanskrit and Rasakalpalatā in Oriya language. The poet Chakrapāṇi Pattanāyak was known by the epithet 'Vakravāk' for his extra ordinary wit and quick composition He has composed Guṇḍichāchampū in Sanskrit on the famous Car festival of Lord Jagannātha at Puri. He has also written two Kāvyas named Kṛṣṇavilāsa and Kiśora Kāvya in Oriya.[5]

The other poet Chakrapāṇi Dāsa has composed Rāmāyaṇīya Ratnaśataka or Rāmāyaṇīya Champū on the story of Rāmāyaṇa and Abhinavachintāmaṇi a work

---

1 Khurudha Itihasa—K. N. Mohapatra, Bhubaneswar, 1969, Page 177-180

2. An Indian Ephemeris Vol, VI, L. D. S. Pillai, Madras, 1922, p. 245.

3. An Alphabetical Cat. of Authors—Ed. N. Mishra, OSM. B. B. S. R., 1983, p. 145 ( OR Mss. 208. OL - 1094 and 1672 ).

4. Ibid ( OL - 936 and OL - 81 )

5. Ibid Page - 146 ( L/96, 124, 125, 502, 511 and OL / 1801 and OR. Mss/188 )

on Āyurveda.[6] The colophon of the first work is noted below :

गद्यात्मकं कविमहत्तमचक्रपाणि—
दासेन चारुचरितं शतपद्यरत्नम् ।
यो वै पठेदनुदिनं शृणुयाच्च भक्त्याऽ
सौ प्राप्य विष्णुपदवीं लभते मनुष्यः ।। ७-१७ ।।

The beginning and the end of his second work, Abhinavachintāmaṇi is quoted below—

अभिनवजलदश्यामं पीतदुकूलविदेहजारामम् ।
विलसितकौस्तुभवामं मङ्गलमूर्त्तिं भजे रामम् ।।
धर्मार्थकाममोक्षाणामारोग्यमूलमुच्यते ।
अतः प्रवृत्तिरचिता शास्त्र सद्वैद्यसम्मते ।।

× × ×

श्रीमद्रामपदाम्बुजस्तुतिकथामाधुर्यधौरेयता-
पूर्णश्रीलपराङ्कुशाभिधसुधाम्भोधेरगाधात्मनः ।
कल्लोलायितचक्रपाणि भगवद्दासेन लीलोद्धृतः
सन्तः सन्ततमन्तरङ्गकरुणं चिन्तामणिर्द्धार्यताम् ।।

× × ×

शालिवाहन भूपस्य भूनेत्रमुनिभूमिते ।
अब्दे कार्त्तिकराकायां ग्रन्थोऽयं पूर्णतां गतः ।।

---

6. Ibid Page - 146 ( P/41 and Ay - 40, 59, 63 )

इति श्रीचक्रपाणिविरचिते अभिनवचिन्तामणौ नवमाधिकाराधि - षड्ऋतुनिरूपणो नाम षट्षष्टितमः [अध्यायः] ।

१८९९ सम्वत्सरे भाद्र कृष्ण १३ शौरिवासरे समाप्तोऽयं ग्रन्थः । सत्यवादी पट्टनायकेन लिखितम् ।[7]

It is known from the above colophon that the composition of the work Abhinavachintāmaṇi was completed by the author on the fullmoon day of the month of Kārttika in the Saka year 1721 or 1799 A. D. In the post colophon it is mentioned that the copy of the manuscript was ccmpleted by Satyabādī Pattanāyak on Saturday, the 13th dark half of the month of Bhādra in the year 1899 the exact date of which is the 2nd September, 1899 A. D.

From the above discussion it is clear that the poet Chakrapāṇi Dāsa was a devotee of Lord SrīRāma and the writer of both the works named Abhinava-chintāmaṇi and Rāmāyaṇiya-Ratnasataka or Rāmāyaṇiya Champū. The other renowned scholar Chakrapāṇi Pattanāyak ( 1750-1800 A. D. ) was a devotee of Srīkṛṣṇa-Jagannātha. He was a poet of later period as the composition or copy of the Bhṛṅgadūta manuscript was completed on 19-10-1721. So the poet Chakrapāṇi Pattanāyak could not be accepted as its author. Hence Bhṛṅgadūta may be a work of some other poet named Chakrapāṇi, a little known poet of Orissa, who flourished in the last part of the 17th, century A. D.

**Summary —**

The poet begins the work with a symbolic prayer to Lord Kṛṣṇa (the black cloud) and describes the pale face of Rādhā resembling a lotus of the dried pond (verse 1-4). Rādhā leaves her house with some of her friends and proceeds to the grove of Vṛndāvana where she becomes unconscious due to unbearable pangs of separation (verse 5-13). But she recovers after careful nursing and rests on the lap of a friend, acuses the spring for her such condition (verse 14-20).

---

7. Abhinavachintāmaṇi, O. S. M. No. Ay/40.

In the mean time a black-bee is seen flying over the buds of the mango tree when Rādhā was being consoled by her female friend (verse 21-22). One of the friends of Rādhā proceeds towards the hornet assuming it as a messenger and welcomes it to observe the sorrowful condition of Rādhā. She requests again to the black-bee to proceed quickly with the bee-friends who are moving towards Yadupurī (Madhupurī) to convey the message of the love-striken Rādhā to SrīKṛṣṇa, take rest if tired, on the trees of the forest and looking at the beautiful dances of the peacocks (verse 23-32).

On the way to the capital of the king of Yadus the lecher is requested to embrace the sweet and scented wind of Yamunā, pay respect to the mountain Govardhana, see the renowned Kadamba tree and the reservoir of Kāliya (Hrada) and reach at Yadupurī where beautiful young Gopi s and pious maidens are residing in the nice big palaces to see always the smiling face of Murāri and forget all their worldly activities (verse 35-52).

The friend of Rādhā again, requests the black-bee to meet its beloved waiting in the mango grove of Yadupurī and then go to the royal court of Yadupuri in the evening and see there yellow robed Kṛṣṇa adorned with all the valuable ornaments. The black-bee is instructed to go to touch the feet of Kṛṣṇa, pay respect and convey the good wishes of Rādhā to him alone after departure of all from the court house (verse 53-68).

Lord Kṛṣṇa, hearing the name of Rādhā, remembers all the past love affairs and request the black-bee to narrate her message in detail ( verse 69-78 ). The bee then, describes the pangs of separation of Rādhā and other Gopīs, their love and devotion, the places of secret sport, the incidents beginning from the death of Pūtanā to his departure to Madhupurī, the example of Nala-Damayantī and Rāma Sītā and requests SrīKṛṣṇa, being a vessel protect them early from the high sea of danger. The female friend of Rādhā tells the black-bee to convey this much to SrīKṛṣṇa and go with beloved to the pleasure garden of flowers (79-108). In brief this is the subject matter of Bṛṅgadūta.

**Critical Appreciation —**

The work Bhṛṅgadūta by Chakrapāṇi contains 138 verses composed in Mandākrāntā metre like other dūtakāvyas of India. It is seen that all the dūtakāvyas

primarily centre round lovers separated from their beloveds. Generally we find in such Kāvyas the descriptions of the past amorous activities of lover and beloved and a messenger was usually selected to convey the message of one to other. But in course of time various topics, characters and ideas were incorporated in the dūtakāvyas basing on the episodes of three great epics of India. The topic of the Bhṛṅgadūta under discussion is also based on Rādhā-Kṛṣṇa līla described in the 10th book of Śrīmadbhāgavata.

Out of the 85 dūtakāvyas noticed or published so far in India the Black-bee as a messenger is chosen in the following works—

(a) Bhṛṅgasandesa or Bhramaradūta by Vāsudeva Kavi ( 1423 A. D. )[8] is a work of 175 verses based on a love theme of hero and heroine. This work has been published by Trivandrum Sanskrit Series No. 128 in 1937.

(b) Bhṛṅgadūta by Gaṅgānanda (1506-1527 A. D.) of Mithila (Tirabhukta) noticed by Leipzing in the Aufrecht's catalogus catalogorum, perhaps has not yet been published.[9]

(c) Bhṛṅgasandesa by Jīva Gosvāmī ( 1533-1618 A. D. ), the son of Vallabha and younger brother of Rūpa Gosvāmī ( 1490-1563 A. D. ) is a notable work of this category.

(d) Bhramaradūta by Rudra Nyāya Pañchānana (1675 A. D.) is based on the story of Rāmasitā and contains 124 verses. This work has been published by Dr. G. B. Chaudhuri from Calcutta in 1940.

(e) Bhṛṅgadūta or Bhramara Sandesa by Kṛṣṇadeva (C. 18th C. A. D.) is based on ŚrīKṛṣṇa-Gopī episode and contains 126 verses. This was published in the Journal of Nagapur University No. 3 in 1937.

---

8. History of Classical Sanskrit literature —M. Krishnamachariar, Delhi, 1974, p. 252.
9. Ibid — P. 782.

(f) **Bhṛṅgadūta** by Paramānanda, **a** resident of a forest on the bank of river Kṛṣṇā (C. 18th A. D.) contains 100 verses in which Kṛṣṇa conveys message to Rādhā through the Bhṛṅga messenger—

भृङ्गदूतमिदं काव्यं कृष्णसद्विभ्रमान्वितम् ।
पठध्वं रसिका नित्यं परमानन्दवर्णितम् ॥ ९९ ॥

(g) Bhṛṅgasandesa by Śrīmatī Triveṇi (1817-1883 A. D.), the daughter of Anantāchārya is also an unpublished work known from the History of Sanskrit leterature.[10]

(h) Bhramarasandesa by Mahālinga Śāstrī (1897 A. D.) has been published by Sāhityachandrasālā, Tanjore in 1954.

(i) Bhṛṅgadūta by Some unknown poet of Orissa contains only 22 verses, the first and last verses of which are quoted below for information of the scholars—

॥ श्रीजगन्नाथशरणम् ॥
सत्यं गोपं वद मधुकर श्रीमुकुन्दोऽपि कामं
ह्यागन्तुं किं मनसि च कदा पृच्छती मां सखी मे ।
श्रीराधां संस्मरति हृदये तस्य हृन्मालिकायां
वामं वृन्दावनसुकुसुमं चिन्तनीयं कथं नो ॥ १ ॥

× × ×

हे भृङ्गमण्डल मुदा चल कृष्णचन्द्रं
ब्रूहीति गोपरमणी चरितं समग्रम् ।
माधुकरी च सुभगा खलु जीवयाहो
संमूर्च्छिता विधुकृपा सुधयाभ्यपास्त ॥ २१ ॥
इत्थं गोपवधू वियोगवचनं श्रुत्वा च भृङ्गस्तदा
प्रोड्डीयाम्बरके जगाम मथुरां कष्टेन गोप्यङ्गनाः ।
गोप्यः कामशराभितप्तहृदया प्रत्याशया मोदकं
श्रीकृष्णस्य मनोज्ञमूर्त्तिघटनाध्यानावलम्बात्मिकाः ॥ २२ ॥
॥ इति श्रीभृङ्गदूतकाव्यं सम्पूर्णम्[11] ॥

10. Ibid — P. 396.
11. Utkal University—Manuscript Cat No. 465.

The Bhṛṅgadūta under discussion may be taken as an addition to the above list. The poet very often imitates the famous work Meghadūta by Kalidasa There are striking similarities of thoughts and lines of Bhṛṅgadūta with those of Meghadūta. One may compare the verses 13, 19, 111, 9 of Meghadūta with the verses 32, 28, 98, 104 of Bhṛṅgadūta respectively.

The poet has exhibited his erudition in describing the beauty of SrīKrṣṇa in the verses from 55-67 in detail. The presentation of SrīKrṣṇa's longing for Rādhā (verses 76-86) and the message of Rādhā to SrīKrṣṇa narrated by the black-bee (verses 79-104) has been made touchy as well as poetical in nature.

**Editorial Note —**

The work Bhṛṅgadūta has been edited basing on a single palm leaf manuscript. A comprrative assessment of the work composed by the poets of differents parts of the country, could not be possible due to non-availibility of other manuscripts and the works printed outside Orissa.

I am grateful and thankful to all officials and scholars who have rendered their assistance for preparation of the press copy and printing of the work.

I request the scholar readers to bear with us for unavoidable lapses, if any, in this edition presented to them for the first time.

Vasanta Pañchamī
The 4th February, 1995

**Bhagaban Panda**
Editor

# भृङ्गदूतम्

श्रीकृष्णाय नमः

चञ्चत्पीताम्बरचपलिनी संरसद्वेणुनाद-
ध्वानामुक्तापटलनिविड़ोद्यद्बलाकावलीका ।
आभीराणां नयनशफरीजीविनी चातकं मां
तन्नीताशं[1] शमयत[2] भृशं कृष्णकादम्बिनी सा ॥ १ ॥

आमोदं श्रीयदुपतिमुखाम्भोजसंभोगजन्यं
गोपीभुक्तं[3] यदवधि पुरःस्त्रीजनः साधु भेजे ।
मेने राधा तदवधि सुखध्वंससंबद्धबाधा
दीना हीना दशमदशया योगमेवात्मभोगम् ॥ २ ॥

कंसारातौ रतिपतिपुरे[4] नागरीचित्तचौरे
राधावक्त्रोल्लसनसमयः शङ्कनीयः क्षणं चेत् ।
तद्दुर्न्मालंच्छिखरकमलं भास्करे दैवयोगा-
दास्ताभस्थाचलमुपगते पद्मिनीफुल्लपद्मा ॥ ३ ॥

आस्यं तस्या विरहदशया दृश्यमानांशुमालं
कामोन्मील[5]न्मदनमदया कृष्णबद्धैकबुद्धेः ।
भेजे पूर्णमनिशमभितः शुष्कषाः पुष्करिण्यां
नैवाधार्कातपमलिनिताम्भोजलब्धामवस्थाम् ॥ ४ ॥

---

१। तन्मीताशं ।
२। शमयन्त ।
३। गोपीभुजं ।
४। रतिमतिपुरे ।
५। कामोन्माल ।

मानोदानीममरपतिना कोपिना संविकीर्ण-
प्रोद्धृत्याद्रिं सदय[1]मतिना शौरिणा यान्ववारि ।
तस्मिन्दूरे वसति सति तल्लोकनाम्भोजयुग्मं
नूनं लब्ध्वा वरमवसरं सातिवृष्टिः प्रविष्टा ॥ ५ ॥

उच्चैर्माद्यन्मदनदहने वक्षसि क्षीणभास-
स्तस्या विश्वक्सरसमसृणं चन्दनं चारुगन्धि ।
हस्तैर्न्यस्तैः कथमपि तपालिलप्यमानं सखीभि-
र्लेभे तप्तायसि पतनजं कर्दमोच्छोषवेगम् ॥ ६ ॥

तद्दीधित्या शिशिरतरया धारिता तोयहीने
भास्वद्भाभिः कबलितपतत्पद्मिनीश्रीसभृद्भिम् ।
सानाजीनाद्विरहविवशा विस्मयं शीतरश्मे-
र्गाथां तथ्यां विषसमजतां[2] श्रावणीं साधु बुद्ध्वा ॥ ७ ॥

कामोद्दामासमशरशरैर्जर्जरान्मानसान्ता-
तस्या धैर्यादिषु विगलितेष्वेव विश्वग्गुणेषु ।
तद्वासी यन्नहि निरगमन्नन्दसूनुः कथंचित्
तत्राशङ्के जगति विदितं तन्महत्वं निदानम् ॥ ८ ॥

क्वेयं रामा मृदुलकुसुमासारसाराङ्गयष्टिः
क्वेदृक्प्रेयोऽविरतविरहः शल्यरोगेण तुल्यः ।
आचिच्छित्सोर्मृशमशनिना भङ्गुरां नूनवल्लीं
नूनं ध्वान्तबुधविरचिते सद्विचारे विरोधः ॥ ९ ॥

---

१। सन्दय ।
२। विषसंजतां ।

शश्वद्दूना[1] शिशिरतनुना का निशा शुभ्रवेशा
कान्तंकान्ता[2]द्विरहबहने को मदः कोकपत्न्याः ।
सम्यक्शस्यं सखि निदिश मामित्थमापृच्छती सा
भूयो भूयो नयनशफरीद्वन्द्वमस्राम्भसौ यत् ॥ १० ॥

एवं राधा विरहविधुरा मन्दिरं मन्दमाना-
रण्यप्रायं कतिपयसखीसंवृता संभ्रमेण ।
सा निष्क्रम्य प्रियविलसितस्मारिकुञ्जं विशीर्णा-
नन्दावृन्दावनमथ कदाप्यक्षिलक्षीचकार ॥ ११ ॥

तस्याश्चित्तं वनरुचिरतावारमात्रावलोका-
न्मोहस्यासीदतिथि सहसा यद्विचित्रं किमत्र ।
यत्सर्वत्र प्रकृतिमधुरश्यामधामावभासः
सा च स्निग्धाचिरपरिचयात्तादृगापत्प्रपन्ना ॥ १२ ॥

भिन्ना भाषामधिकचिरसाभाविशीर्णाङ्गयष्टिं
स्थानभ्रष्टामिव न वलतां तां तथा नष्टचेष्टाम् ।
सख्यो वीक्ष्य क्षितिनिपतितामार्त्तिजानां प्रवाहे-
ष्वस्राम्बूनां नयनशफरीः प्लावयामासुराशु ॥ १३ ॥

ताः संत्रस्ताः प्रणयनिभृता वीजनाद्यैः प्रयुक्तैः
सर्वोपायैः श्रममतितरामर्च्चयामासुरेव ।
प्रायः प्रेयः पदनिगदनात्तच्छ्रुवः सामभूमा
रोमाञ्चस्तु व्यरमय दरं तद्धृतानिष्टशङ्काम् ॥ १४ ॥

---

१। शश्वद्दीना ।

२। कान्तंकान्तो ।

भ्रश्यद्वासः कबरवलया सा समालभ्य भूयः
संज्ञां विज्ञस्वजनसदसः सम्यगाश्वासजाताम् ।
किंचित्किंचिन्नयनकमले घूर्णयन्त्यश्रुपूर्णे
हन्तोदस्थात्कथमपि समं तत्प्रमोदाङ्कुरेण ॥ १५ ॥

कूलं क्लिश्यन्नलिनमलिनां धूलिसंदोहिदेहां
कृत्वैकस्या उरसि शयने तामुरुजोपधाने ।
चेतस्तस्याः क्षणमपि रसादन्यथावृत्तिकर्त्तुं
सख्याः साक्षादिति मृदुपदं बोधयन्त्यः समूचुः ॥ १६ ॥

कस्माद्भूमावलयकमले शोकमेकान्तमेतं
चित्तस्यान्तः स्थगयसि मुधानुक्षणाक्षीणबाधा ।
लब्ध्वा श्वासं चपलय मनो मीनमस्मिन्वनान्ते[१]
स्वप्राणेशप्रणयबड़िशोद्विद्धमप्यल्पमेव ॥ १७ ॥

जागर्त्यस्मिन्सुरभिततमः[२] कामिनां मानसौणी-
द्भेदे व्याधः स्मरनरपतिप्रेरितो वासरागम् ।
माद्यद्भृङ्ग[३]ध्वनितमनिशं यस्य गीतायतेऽद्धा
रोपायन्ते मुकुलविसरास्तामिताश्चाम्रकाणाम् ॥ १८ ॥

पश्यैता[४]स्मिन्मयि सखि मधौ दक्षिणो मातरिश्वा
मन्दश्चूतप्रसवसुरभिविश्वविश्वासकारी ।
हन्तैकान्तं विरहिषु परं स्वीयदिक्पालधर्मं
कामोद्दामाशुगततिहतिं घ्नन्तु[५]मासाद्य धत्ते ॥ १९ ॥

---

१। यनान्ते ।
२। सुरभिः ।
३। माद्यभृङ्ग ।
४। पश्यैत ।
५। हेन्त ।

यूनामस्मिंस्त्रिभुवनलसद्भूरिलाण्यभूमेः
स्वैरं लब्धोपचयसमयोऽदत्तपादोऽप्यवन्याम् ।
चित्तं वुन्यन्नतिकटुगिरा कोकिलो व्याजमृद्व्या-
लोके साक्षात्प्रथयतितरां मन्दपुष्टस्वभावम् ॥ २० ॥

संप्रत्यायास्यति हरिरये गोकुलं मा खिदस्त्वं
चन्द्रः सान्द्रः सततविमलो लक्ष्मलक्ष्म्याकुलोऽपि ।
सत्कस्तूरीतिलकललितं[1] पूर्वभुजं मुखं ते
पूर्णस्तूर्णं सखि निशि रहः स्मारयिष्यत्यवश्यम् ॥ २१ ॥

इत्थं तासु प्रबलविरहव्याधिसंबाधिताङ्गीं
राधां मुग्धां[2] रणितकरुणं धारयन्तीषु बोधम् ।
मन्द्रध्वानः[3] किमिदमिति ता हुंकृतेनैव पृच्छ-
न्नग्रे चूतं नवकुसुमितं प्राप कश्चिद्द्विरेफः ॥ २२ ॥

दृष्ट्वा हृष्टाः सदयमिव तं प्राप्तमाभीरपत्न्यः
स्वं स्वं देशं प्रियसहचरी दुर्विदग्धाधिरूपम् ।
श्रीकंसारेः पदकमलयोर्ज्ञापकं योग्यमृद्य-
द्रोमाञ्चाभ्यञ्चिततनुलता मेनिरे दूतमेनम् ॥ २३ ॥

काचित्तासां विषयमपरा[4] कूतमन्तः स्फुरन्तं
गोपीज्ञानाग्रगतमलिनं साधुसंबोधयन्ती ।
राधा वाधा निरवधि भवद्भृङ्गविध्यं सनाथं
धैर्याधारावधरितसुधां भारतीमावभाषे ॥ २४ ॥

---

१ । कलिलं ।
२ । राधां ।
३ । ध्यानः ।
४ । विषयवन्तरा ।

कच्चिद्भृङ्गोत्तम पथि तव स्वागतं तेऽस्तु भद्रं
मार्द्रं कृत्वा स्वमन इह नः प्राणवश्यां वयस्याम् ।
श्रीमद्वृन्दावनशशधरोद्ध तविच्छेदवह्नि-
ज्वालामालाकवलितकलां पश्य बालां विलोलाम् ।। २५ ।।

पीत्वा दिव्यं मधु सुमनसां संसदि प्रस्फुटानां
मन्द्रोत्तानश्रवणमधुरं भाषमाणो विभासि ।
तेनैतस्याः परिणतमिमं दुर्विपाकं विधातुं
शौरेः पादाम्बुजपरिसरे त्वां वयं हि प्रसन्नाः ।। २६ ।।

संयोज्यास्ते विरहदहनज्वालयास्मान्मुरारि-
र्दीर्घो[1]कुर्वन्मधुपुरवधूभ्रूलताकौतुकीनि ।
तस्मात्तस्य श्रवणपुटके वाचिकं नः समस्तं
दीनापत्तिश्रुतिसहचरं त्वं सखे संदधीथाः ।। २७ ।।

चूतच्योतन्मधुमधुरिमाधारमास्वाद्य[2] सद्य-
स्तिष्ठन् हृष्टः क्षणमिह सुखं भूरुहे चानुभूय ।
प्रस्थातुं श्रीमधुरिपुपुरं सादमानादीनान्त-
र्गच्छेच्छीघ्रं[3] वियति तनुतात्पक्षती वीक्ष्यमाणः ।। २८ ।।

येन यासीद्व्रजपतिसुनः साग्रजोऽक्रूरलाभा-
दादेष्यन्त्या मधुपुरमितो वर्त्मतस्त्वां[4] वयस्य ।
वातस्पर्शप्रकटमुरजिद्वैजयन्तीस्रगुद्यद्
दिव्यामोदानुसरणकृतश्रेणयस्ते सगोत्राः ।। २९ ।।

---

१ । दीर्घां ।
२ । धारसास्वाद्य ।
३ । दीनागोपार्वियति ।
४ । वसतत्वां ।

सर्वाशाभिप्रसरदमलश्यामधामप्रवाहे
यस्यां याति श्रुतिसुखनदत्स्यन्दने नन्दसूनौ ।
तन्निध्यानप्रमदलहरसंवृताशेषभावा
नृत्यन्त्यद्याप्यनुपदकलं केकिसधा रटन्तः ॥ ३० ॥

यस्यां नेत्राविरलविगलल्लोतकापाङ्कुलाया
चेष्टन्ते च स्मरहुतवहोत्तप्तदेहा पुरन्ध्र्यः[1] ।
तत्संसर्गाद्विषमितचलच्चारुचक्रान्तचिह्ना
सा ते ज्ञेया सपदि पदवी भृङ्गवंश्यावतंस[2] ॥ ३१ ॥

श्रान्तः श्रान्तः कुसुमनिकरोद्भारनम्रीकृताग्रे
पायं पायं मधुसुमधुरं शाखिसंघे विखेदः ।
गुञ्जन् कुञ्जभ्रमदलिकुलप्रीतिदत्तामनन्ता-[3]
मर्हन्निद्रां त्वमनु विपिनं तत्र चित्रं जिहीथाः ॥ ३२ ॥

यान्तं स्वान्तग्रथितविकलाभीरपत्नी विपत्तिं
श्रीमद्दामोदरविलसितां राजधानीं यदूनाम् ।
वायुर्भास्वद्दुहितृलहरीलास्यशिक्षागुरुस्त्वा-
माश्लिष्येदश्लथमुपहरन्नम्बुजा[4] मोदमुग्रम् ॥ ३३ ॥

क्रुध्यद्वज्रायुधपरिभवं दुःसहं यो विषह्य
प्राज्यप्रस्थः सभयमखिलं गोकुलं संजुगोप ।
तं कंसारेः करसरसिजस्पर्शसंमोदभाजं
भ्रातर्जायाः सनमनमनुज्ञाप्य गोवर्द्धनाद्रिम् ॥ ३४ ॥

---

१। पुलद्य: ।
२। युग्मकं ।
३। मनसा ।
४। न्निम्बुजा ।

## भृङ्गवृत्तम्

त्रैलोक्यश्रीनिलयमुरभित्पादपद्माभियोग-
प्रोद्यद्भाग्यातिशयविषयं सर्वदापि प्रफुल्लम् ।
अस्मद्वस्त्राहरणसमयालापसाक्षित्ववक्षं
पश्यस्यग्रे भ्रमरवर यं निर्विलम्बं[१] कदम्बम् ॥ ३५ ॥

मूर्ध्ना साधो विधुरहृदया त्वां प्रणम्येति याचे
तस्मिन्नस्मत्सकरुणमनो मा कृथा संनिवेशम् ।
तन्मध्याक्रप्रमदवलिता[२] स्मन्मनोऽभीष्टचित्ते
जाते तावत्त्वयि वत परं किं विधत्तां सखी नः[३] ॥ ३६ ॥

गोपीसंख्यानुगुणविलसत्तद्वपुः श्रेणीलास्य
भ्रस्यद्वन्यस्त्रगभिविसरत्सौरभामन्त्रितालिः ।
पादन्यासोन्मथितनिपतद्वल्लिसंवेल्लितान्तं[४]
रासक्रीडास्थलमणिहरेस्त्वां विधेयं[५] विदध्यात् ॥ ३७ ॥

नित्यं भक्तैरभिमतफलप्राप्तये संविकीर्णो
वृन्दादेव्याश्चरणकमले वन्य[६] पुष्पोपहारः ।
श्रीखण्डाङ्काकृतिविततिना[७] सारिणा सौरभेण
त्वामाकर्षेद्विहितरभसं रश्मिनेवातिदूरात् ॥ ३८ ॥

लावण्याम्भोनिधिमुरहरश्रीमदङ्गाभिषङ्गात्
क्ष्वेडोत्खिन्नः सुधितसलिलस्तत्क्षणं यो बभूव ।
भ्रातस्तस्मिन्किल कमलिनीं कालियस्य ह्रदे त्वं
नोचेच्चुम्बेरिह सुविदितं सारवित्त्वं वृथा स्यात् ॥ ३९ ॥

---

१। आलिङ्गननिवृत्तं ।
२। ववित्ता ।
३। युग्मकं ।
४। वक्रमित्यपि ।
५। विघ्नयोनिघ्नयत्नो ।
६। वन्द ।
७। विस्तार ।

इत्थं झङ्कारितसखसुखोद्भेदविकल्पाः सुपुष्प-
स्तास्ता वाचामविषयरुचः कृष्णसंक्रीड़भूम्नः ।
पश्यन्नस्यन्निमिषमति गतं मन्मनाम्नाभिरामं
स्वैरं रम्यां व्रज यदुपुरीं विश्रुतां क्षोणिचक्रे[1] ॥ ४० ॥

ब्रह्मेशाद्यैरमरनिकरैः शौरिपादाम्बुजाग्र-
भ्रश्यद्धूलिकणसरभसैर्भूरिसंबाध[2] मध्या ।
हंसौघाद्यै[3]र्वत परिसराद्यानसंघैः समन्ता-
ग्रामर्त्ते संवहति निखिलां विष्णुलोकश्रियं या[4] ॥ ४१ ॥

ये नेतारः सकलजगतां विज्वराश्चिर्जरेन्द्रा-
स्तेषां द्वास्थ[5] प्रहरणभयात्तिष्ठतां[6] द्वारि दूरात्[7] ।
यस्यां यात्रा सपदि पुरितो ज्ञापयित्वा मुरारे-
र्नेतारोऽर्घ्याम्बुजपरिसरं[8] यादवाः सम्भवन्ति ॥ ४२ ॥

लावण्याम्बुप्रसरलहरीलास्यवेश्मन्यवश्यं
यस्मिन् पूर्वं पतति नयनं नान्यतो यत्तु याति ।
यस्यां देवा बत मुरभिदस्तन्वनो भूपरार्द्धं
श्रीवासस्याखिलमवयवं नैकदा द्रष्टुमाप्ताः ॥ ४३ ॥

या सौधानां शशिरुचिसुधासान्द्रिताभ्रंलिहानां
शुभ्रव्योमाङ्गणपरिमिलन्नर्त्तकैरंशुपूरः ।
श्रीगोविन्दस्थितिसमुदयन्मङ्गलोत्सर्पिदर्पा
भारयाभीणा[10] सुरपतिपुरीमाहसन्तीव भाति ॥ ४४ ॥

---

१ । क्षोणिचक्रे ।
२ । संकुल ।
३ । वृषभ ।
४ । यदुपुरी ।
५ । विस्मये ।
६ । तस्मात् ।
७ । कन्दर्पगणना ।
८ । सौधोत्या ।
९ । सुधालेपो तत्र ।
१० । आभोगपरिपूर्णता ।

नानारत्नप्रचयरुचिरात्तन्निरोध[1] नितम्बा-
त्संभ्रान्त्ये[2]वोद्गलितयमुनानीलचेलां शुवर्णाम्[3] ।
माद्यत्पारावतनिजरुचिः मानिनीं कामिनीं वा[4]
यां स्वच्छन्दं विहरति हरिः प्राप्य दुष्प्रापभावः ॥ ४५ ॥

सर्वावध्यः[5] किल कुलभवाविर्गतास्ता वयस्ये
त्वां मामेवाक्षिपसि किममुं नेक्ष्यसे श्रीमुकुन्दम् ।
काश्चित्सद्यो मदनविवशाद्यद्विलोकादनीशा
निर्गन्तुं संविदधति मुखाम्भोजभूषान्गवाक्षान् ॥ ४६ ॥

कीदृक्ते संप्रति विरचितं साद्ध्वनेपथ्यमित्थं
कोणेनाक्ष्णः स्मितमुखी मुधामाहसो मा दिशन्ती ।
एषः श्रीशः स्नपितसकलः स्मेरनेत्रान्तःपातैः
स्निग्धश्यामाः सपदि कुरुते कामवस्थां न कस्याः ॥ ४७ ॥

गोप्यः पुण्यं किमिह विदधुर्दुष्करं नेत्रभृङ्गा
यासामस्याननसरसिजं[6] नित्यमेवं पिवन्ती ।
सभ्रूभङ्गस्मयनसुधया प्यालि[7]किंचिन्निषिञ्चन्
स्तम्भस्तब्धां सलिलकलिलां त्वां च मां यः करोति ॥ ४८ ॥

श्रीमद्वृन्दाविपिनसुमनो धन्य चानेन लीला
लोलापाङ्गप्रसरविशिखव्रातके संविकीर्णे ।
मामेवैकां सखि निगदसि प्रोल्लसत्कण्टकाङ्गा-
मित्थं म्लिष्टं स्वरमपि निजं नाभिजानासि भूयः ॥ ४९ ॥

---

१ । तद्विरोधो ।
२ । संभ्रमणेनैव ।
३ । चेलांसुवर्णां ।
४ । मथुरा ।
५ । सरसी ।
६ । सखी ।

अस्मिन्नारीनयनसुभगप्रीतिविक्षेपपूजा-
मायच्छत्यस्थिरतनुननु त्वं न किं संदधीथाः ।
तारं हारं वसनमपि विश्रस्तमङ्गादिति त्वां
यावद्भाषे सखि निजवपुर्निष्प्रभं तावदीक्षे ।। ५० ।।

एषाहं ते प्रियसहचरी तोयपूर्णे च नेत्रे
संमृज्यैतद्वदनकलने नैव विघ्नं करोमि ।
यं वीक्ष्य त्वं स्तिमितनयनास्तंगते वासि दूरा-
न्मुष्ये सोऽयं व्रजति सविधे वीक्षसे किं न भूयः ।। ५१ ।।

यस्यां साधो नरपति पथं तोरणीभूतपौरं
भ्राजन्नेत्रोत्पलततिरुचिश्यामितान्त नितान्तम्[1] ।
श्रीकृष्णे प्राक्प्रविशति शरच्चन्द्रसान्द्रांशुवक्त्रे
लीलालापा इति सरभसं[2] सुन्दरीणां बभूवुः ।। ५२ ।।

आमासाद्य प्रथितपदवीमासंघातसान्द्रे
त्वं विश्रम्य क्षणमुपवने चूतपानं विदध्याः ।
तां सौगन्ध्यानुसृतिपटुभिर्व्रातिभिस्ते प्रियाभिः
सायाह्ने श्रीयदुपतिसभामाविशेद्विश्वशो भाम् ।। ५३

तस्या कस्याप्यधिविरचिते दिव्यपुष्या[3]वतंसे
संन्यस्य[4] प्राङ्विटपिनिविडं[5] मञ्जुपुञ्जान्निवेश्य ।
श्रीकंसारेश्चरणकमलद्वन्द्वसेवाप्रभावा-
दालोकेथाः सदृशवपुशः साधु सर्वान्द्रुमेण[6] ।। ५४ ।।

---

१ । अत्यर्थं ।
२ । सोत्सुकं ।
३ । पुष्पां ।
४ । सभ्यस्यां ।
५ । प्राग्विटपिनिविडं ।
६ । द्रुमेण ।

यस्मिन्मग्नं क्रमनिपतनात्पुण्यलावण्यसिन्धौ
चक्षुस्ते स्यात्सपदि नितरां विस्मृतान्यप्रयाणम् ।
सौम्योद्दाम प्रसरपरमानन्दसन्दोह देहं
तं जानीयाः पशुपरमणीश्रेणीसर्वस्वरूपम् ॥ ५५ ॥

तस्यैवाधश्छविजितजवाराशिरागं प्रफुल्लं
पादाम्भोजद्वयमधिलसत्यङ्गुलीपत्रचारु ।
शुभ्राणां यन्नखमणिरुचामण्यणुः कान्तिजन्यं
निःशेषेणाधरयतितरां कोटिकन्दर्पदर्पम् ॥ ५६ ॥

सान्द्रश्यामेन्द्रमणिकदलीकाण्डयुग्मं यदि स्या-
त्तस्योरु संप्रभवति तदा वाक्कृतार्थोपमानम् ।
सम्पत्त्यर्थं स्मरधरणिभृद्राज्यद्वन्द्वध्वजौ या-
वास्तां पीताम्बरकनकभूकिङ्किणीकालभूषौ ॥ ५७ ॥

कामोन्मादद्यन्मृगयति लसन्मध्यभागस्य तस्य
द्योतं धत्ते निविडललितं पीवरं श्रोणिबिम्बम् ।
आसीनस्य स्मरनरपतेः पृष्ठरङ्गाङ्गणे यत्
शश्वज्जेता सकलजगतां किं नु लीलोपधानम् ॥ ५८ ॥

मित्यं श्रीमन्मदयति न कं चारु तस्योदरं तत्
सम्यग्भङ्गित्रिबलिललितं भृङ्गयूथाधिनाथः ।
यत्रोत्थात्ते स्फुरति विवशा नाभिगर्त्ते पतन्ती
स्वैरभ्रान्त्या निखिलवनिता मत्तचित्तेभसंधाः ॥ ५९ ॥

श्रीवत्साङ्कच्छुरितममलं फुल्लतापिञ्छकान्ते-
र्वक्षः पीनं जयति विततं तस्य साक्षाच्च ते स्यात् ।
यस्मिन्लक्ष्मीर्विलसति सदा वैजयन्ती च लम्बि-
न्यल्पाल्पं यच्छबलितरुचिर्दृश्यते कौस्तुभोऽपि ।। ६० ।।

भ्रातस्तस्याशितमणिशिलास्तम्भपीनप्रलम्बौ[1]
बाहू पश्येः कनकवलया वार्त्तदीनावलम्बौ ।
यौ गोविप्रप्रणयविमुखक्रूरसंनाशहेतू
यौ चाभीक्ष्णं निगमनिरतानन्दनिस्यन्दहेतू ।। ६१ ।।

विश्वोद्भारप्रहसमुचितोत्तुङ्गवृत्तांसभाज-
स्तस्य ग्रैवेयकपरिचितं कम्बुकण्ठं स्मरामि ।
य स्याद्व्यक्तोच्चमृदुमधुरा भारती निःसरन्ती
निन्दत्यम्भोधरपरभृतश्रेणीवीणानिनादम्[2] ।। ६२ ।।

साधो विम्बाधरदलगलद्दिव्यपीयूषपूरं
तस्य श्रीमद्वदनकमलं दृश्यते मत्पुरस्तात् ।
रत्नभ्राजत्कनकमुकुरा[3] कारमुद्रा युगान्त-
र्विद्योति स्यात्किमिव यदिति ध्यानसक्तास्मि नित्यम् ।।६३।।

तस्येक्षेथाः किल सुकृतिनां त्वं धरण्यां धुरीणः
शोणाम्भोजव्रजरुचिमदोन्मोचने लोचने ते ।
मारोग्रभ्रामिजयधनुषी ते भ्रुवावानतौ[4] च
श्रीकण्ठारेरिषुधिविवरामुन्नतां तां च नासाम् ।। ६४ ।।

---

१ । प्रलम्वी ।
२ । निनादवान् ।
३ । मुकरा ।
४ । वानते ।

चञ्चद्‌भृङ्गालकमधुकरश्रेणीसुस्मेरवक्त्रा-
म्भोजस्यास्यानुपमतिलकं भालसंस्थं नमामि ।
हित्वा सर्वं वयमतिमदाद् यद्विलोकान्निमग्नाः
शर्माम्भोधौ कुशलगणयामासि माद्यन्न[1] किंचित् ।। ६५ ।।

सुस्निग्धाकुञ्चितनतकचव्रातवत्युत्तमाङ्गे
नानावर्णस्फुटमणिगणं तस्य पश्येः किरीटम् ।
यन्निर्गच्छत्किरणपटलारञ्जतः पीतवासा
धत्ते पूर्णां सुरपतिधनुष्मत्तड़ित्वच्छविं सः ।। ६६ ।।

तं श्रीकान्तं स्थगितविलसत्पक्ष्मसर्वानवद्यं
सभ्यानां निःसरणसमयं वीक्ष्यमाणः क्षमेथाः ।
पश्चादेकं यदुपतिमिमं त्वं रहः संनिपत्य
श्रीमत्पादाम्बुरुहसविधे[2] तारमन्द्रं ब्रवीथाः ।। ६७ ।।

त्वद्विच्छेदनलवहनादङ्ग[3] दीनार्त्तबन्धो
राधाकण्ठान्तरपरिलुठत्प्राणमात्रावशेषा ।
आलीभिः स्वाभिरभिकलिता त्यक्ष्यती जीवितं ते
पृच्छत्येतत्पदकमलयोर्मङ्गलं कोटिकृत्वः ।। ६८ ।।

उक्त्वेतावत्त्वयि विरमति प्रीतिमान् सौम्य सद्यो
राधाशब्दश्रवमयसुधासारसेकोद्ध्वरोमा ।
पश्यन्नन्दग्रहणविरतेनाक्षिपद्मद्वयेन
स्नेहार्द्रेणान्धकपतिरणि प्रक्ष्यति त्वां सरागम् ।। ६९ ।।

---

१ । माग्वन् ।
२ । समीपे ।
३ । दलननिवहनङ्ग ।

स्यात्ते स्वस्ति प्रतिदिनमहो भव्यचूड़ामणे मां
दिष्टया राधेत्यभिदधदलं प्रीणयस्वाङ्ग[1] भृङ्गम् ।
कच्चित्संप्रत्यतनुविधुरा सा मम प्राणकीरा
किं हारा वा विरहितमुखी श्रस्तहारा करोति ॥ ७० ॥

जाने तस्याः प्रणयनिभृतभूरि मय्येव चित्तं
नित्यं सत्यं विरहगरिमा तापयेत्तां दुरन्तः ।
भूयो माद्यत्सुरभिरजनीष्वासु[2] बालां मृगीं तां
क्रूरः कुर्यान्मदनमृगयुर्हन्त[3] किं रूपचेष्टाम् ॥ ७१ ॥

सा मे प्राणाधिकतर सुहृन्मन्दवाताभिषङ्गा-
त्तप्येताद्यान्यभृतनिनदार्तिक तु कम्पेत सद्यः ।
मुह्येच्चन्द्रोदयपरिचयादित्थमाचष्टमानां
नूनं हृद्या न कति बहुधा तापयेत्ता वयस्याः ॥ ७२ ॥

या या गोवर्द्धनगिरिगुहाकुञ्जपुञ्जे सुगुञ्जद्
भृङ्गे लीलाः सहविरचिताश्चित्ररूपास्तया मे ।
तास्ता ध्यायन्त्यनिशमधुनाज्ञातबाह्यां दधाना
शून्यां दृष्टिं कथमिव सखे वर्त्तते सा प्रिया मे ॥ ७३ ॥

मुग्धेऽनुज्ञां वितर नगरीं यामि निर्याणकाले
पृष्टेत्थं सा व्रजपथि सुखं मां निगद्येति भूयः ।
राधां ध्यायेः किमयि यदिदं केलिकीरामगादी-
त्तन्मे मर्माण्यलिवरसमुत्कृन्तति[4] स्वान्तनिष्ठम् ॥ ७४ ॥

---

१। प्रीणयस्याङ्ग ।
२। रअनीष्यासु ।
३। हन्ति । हन्त ।
४। समुत्कृति ।

सा मां दृष्ट्वान्यपदगलिता त्यक्त[1]कान्तं कदाचि-
न्मा मां संस्पृशति जल[2]कुल क्लिन्ननेत्रेति यान्ती ।
वाले किं किं किमिति च मया निर्भराश्लिङ्गितास्ते
सद्यः प्रोद्यत्पुलककलिका[3] कामनोन्तर्विलीना ॥ ७५ ॥

एतस्यास्ता मधुकरसुधास्यन्दिनीर्वाग्विभङ्गी-
र्भ्रूवल्लीप्रोल्लसनमधुरास्ताः कटाक्षच्छटाश्च ।
अन्तर्द्रष्टुयाप्यहमपि विधिप्रीतिकूल्याव्रजन्त्वं
किं वा केनाधिमहि घटये तद्धि[4] सम्यङ् न वेद्मि ॥ ७६ ॥

सा नैराश्यान्मुकुल[5] विहरत्कोकिलां चूतशाखा-
मप्रेक्ष्यार्त्ता श्वसिति किमपीत्येतदेवातिदिष्टचा ।
भद्रं तावत्त्वमिह यदगाः कच्चिदद्याह किं सा
सन्तापं मे शिथिलय सखे तत्समग्रं निगद्य ॥ ७७ ॥

आगच्छागच्छ मम सविधं मत्प्रियाद्दूतमेव[6]
श्लिष्यामि त्वामिति निगदतानेकधा तेन पृष्टः ।
संस्मृत्य त्वं मनसि निखिलं मध्यसन्देशमेतं
तस्मिन्काले श्रवणपदवीं प्रापये श्रीमुरारेः ॥ ६८ ॥

यामित्थं पृच्छसि विरहिणी साऽपि किंचिद्विमुक्त-
स्तादृक्खिन्ना न भृशमकशव्यक्तिवरं कम्पितौष्ठी ।
तत्तस्याः काचन सहचरी वेदनाज्ञा भवन्त
सद्यत्नेणी कलत महिमन् ज्ञापयत्याप्तचिन्ता ॥ ७९ ॥

---

१। गलितावत ।
२। स्पृशजल ।
३। क्लिलिका ।
४। तद्वि ।
५। नैराश्याद्गुकुल ।
६। प्रेम ।

भो त्रैलोक्येश्वर समुचितं सत्प्रभूणामिदं चे-
त्तत्ते सर्वोपरि विलसितं कुर्वता नस्तथैव ।
यः सर्वाशाग्रहणविमुखः संश्रयत्यंघ्रिपद्मं
प्रक्षिप्येमं वृजिनजलधौ वाचि नावास्यते यत् ॥ ८० ॥

प्रागस्माभिः कलितमनृतं रूपतुल्यं मनस्ते
संनिर्ण्णितं सकलमधुना सर्वसौन्दर्य्यराशेः ।
निःस्वं कृत्वामरपतिमहो निर्ममौ वामवर्त्तो
धातारूपं निखिलसुधया किं त्वशन्या मनश्च ॥ ८१ ॥

गोपीत्यागस्तव समुचितः साम्प्रतं यादवेन्द्र
स्मृत्वा नीपं तदपि कुशलप्रश्नवाक्यं न देया ।
मत्वा यः प्रागृतमिव वृथास्मासु सम्यक्प्रवृत्तं
त्वद्वात्सल्यं कुसुमपुलकोच्छूनमद्यापि भाति ॥ ८२ ॥

यत्प्रीत्यर्थं तव गिरिसुतामर्च्चयाम्यैकभावं[१]
तच्चेवेदं[२] परिणतमिदं कः पुन श्रद्दधीत ।
विश्वोद्धारप्रभवनिखिलं कम कृष्णार्पितं सत्
यात्यक्षय्यत्वमिति सततं पण्डितास्तद्[३]भणन्ति ॥ ८३ ॥

किं युष्माभिः कुलममलिनं त्यक्तमेकान्तधर्मं
निन्दामेवं परिवृत कथा मा स्मा मीमांसमानः ।
ईदृग्रूपं त्रिभुवनवधू धीरतोन्मूलनं ते
भूयो हस्ते मधुरमुरलीमोहिनी सापगीतिः ॥ ८४ ॥

---

१। मार्च्चयामैकभावं ।
२। तच्चेदेदं ।
३। पण्डिताश्च ।

त्वां विस्मर्तुं सकलजगतामन्तरात्मन्तपन्तं[1]
स्वान्ते सन्तं प्रणयविमुखं भूरियत्ना[2] भवामः ।
तास्ते लीला विषदमधुरास्ते विहारप्रदेशाः
नित्यं नूत्नाः कथमपि मतं तन्न निर्वाहयन्ति ॥ ८५ ॥

हित्वा गोपीर्यदि जिगमिषा वर्त्तते कंसशत्रो
किं कालिन्दीह्लदसलिलतः कालियः[3] कालितस्ते ।
तत्सद्भावे व्रजभुवि बहुंस्त्वद्वियोगाग्निदाहं
कः कस्याग्रे सरति गदितुं दुःखमस्थास्यदेतत् ॥ ८६ ॥

भद्रं तावत्पशुपरमणीः सङ्कटे पातयित्वा
त्वं चेदायाश्चरणपतिताः किं च याचामहे त्वाम् ।
निर्गम्येतश्चपल विहसन् दृश्यसे नः पुरस्तात्
सर्वावस्थास्वपि यदनिशं संनिवर्त्तस्व तस्मात् ॥ ८७ ॥

पूर्वं यां वञ्चनसुचतुराभीरसीमन्तिनीनां
साक्षाल्लक्ष्मीमिति जगदिथ त्व ध्रुवं जीवितं मे ।
राधाधाराविरतनयना साद्य खिन्ना[4] नितान्तं
त्वं चोत्फुल्लकमलनयनः स्वैरमानन्दमाह[5] ॥ ८८ ॥

त्वत्पादाम्भोरुहयुगमनः संनिवेशं विना ते
सख्यास्माकं कथमितरथा ज्ञानवत्यापराद्धम् ।
प्राणत्राणेतरपरिणतेः पूतना हन्तिरेतां (?)
दुर्वारा या विरहविपदः किं नु पात्रीकरोषि ॥ ८९ ॥

---

१ । रात्मस्तपन्तं ।
२ । भूरिघत्ता ।
३ । कालीयः ।
४ । साद्यखिनी ।
५ । आनन्दसाह ।

त्वत्प्रस्थानावधि सहचरी मन्यतेऽन्यं सुसिद्धं
रुद्रोद्गीर्णं विषमुदधिजं दुर्जरत्वान्निपीय ।
निद्रायां कज्ज्वलमलिनतास्मिन्निती वास्पृशन्त्या-
मन्ना[1] सारैर्नयनयुगलं क्षालयत्येव नित्यम् ॥ ९० ॥

बालास्तीर्णां नवदलमयीं साहसं वीक्ष्य शय्यां
कृष्णा सर्वत्यजनकुशला नूनमङ्गीकृतस्य ।
नोचेत्सिन्धूदरविनिहितो वाड़वाग्निः प्रकामं
मद्वेश्मान्तर्ज्वलति कथमागत्य दुर्वारवीर्य्यः ॥ ९१ ॥

भ्रान्ता सैवं वदति भगवन्नुद्यतीन्दौ सतारे
संवर्त्तः[2] संप्रति युगगणेष्वेष्यतीतेषु दिष्ट्या ।
यस्मिन्नेष प्रहवति दधद्या दशात्मापि भास्वा-
नैकं रूपं प्रतपति जगद्भस्मसात्कारभीमम् ॥ ९२ ॥

हा हन्तेयं सरसविलसच्चन्दनाचर्च्चिता चेद्
भूम्यां कीदृगद कवलिता रौति संचेष्टमाना ।
मन्दोद्धूतैः सजलनलिनीपल्लवैर्वीजिताङ्गी
झञ्जावाताहतनवलताम्लानिमाप्नोति सद्यः ॥ ०३ ॥

संभ्रान्तां लम्पट[3] हृदि पुरस्त्रीगणायन्निते[4] ते
तत्क्षणोत्येतामतनुरनलं वीक्ष्य नूनं दयालुः ।
दैवे [वामे] चरति सुचिरात्तन्न सिद्धत्यभीष्टं
भूयः सख्याः किमपि वपुषस्तक्षणीयावशिष्टम्[5] ॥ ९४ ॥

---

१ । मस्ता ।
२ । सर्वात्तः ।
३ । संभ्रान्त लम्पटं ।
४ । घन्निते ।
५ । स्तक्षणीवशिष्टं ।

सा संविष्टा किमपि नयनामीलने जातु जाते
लब्ध्वा त्वां क्व व्रजसी जलदश्यामलेत्यालपन्ती ।
आश्लेष्टुं यं दृढभुजलताग्रन्थिपाशं विधत्ते
तस्मात्कृष्णं प्रसभमपतंस्त्वं कथं निर्जिहीषे ॥ ९५ ॥

सख्यः सर्वां व्रजभुवमिमां कः सन्ताद्वृणीतां
ग्रीवायोभिः पुनरिह यथा नाव्रजेत्स प्रतीपः ।
यास्यामस्तं[1] शरणमवला दीनभावाद्द्वियं
ब्रूते स्वप्नेऽप्यदय विफले त्वत्परिष्वङ्गयत्ने ॥ ९६ ॥

गुञ्जापुञ्जावलयितलसत्केकिबर्हावतंसं
सुस्मेरास्याम्बुरुहमबलामानभङ्गत्रिभङ्गम्[2] ।
आलिख्य[3] त्वां मृगमदरसैः सा रहः पूर्ववृत्ता-
द्वेणुं स्वाख्याग्रहणकुशलं हस्तयोर्नो विधत्ते ॥ ९७ ॥

त्वामेकान्ते लिखितमपि सा वक्षसापीड्य[4] गाढं
चुम्बन्तीं मामुपगतवतीं वीक्ष्य नोन्नीतवक्त्रा ।
चक्रे चेलाञ्चलपरिवृतं यच्चिरं तत्क्षणं तत्
सर्वं जानात्यहमकलयं त्वद्विना स्यां वयस्याम् ॥ ९८ ॥

मोहस्यान्ते प्रियसखि वृथा किं न्विदं ते सखीभिः
पृष्ट्वैवं सा सजलनयनाश्वासपूर्वं ब्रवीति ।
तस्मिन्नस्मत्प्रकटकपटे संकटात्मन्यति त्वं
यत्संसक्ताधिकतरमहं तत्फलत्यद्य नूनम् ॥ ९९ ॥

---

१ । यस्यामस्त्व ।
२ । त्रिभङ्गिम् ।
३ । आलेख्या ।
४ । वक्षसापान्त्य गाढं ।

सर्वान्तर्वित्किमिह बहुना भाषितेनाग्रतस्ते
धाता क्रूरः किल यदनया तां वियत्या युनक्ति ।
तद्बीजान्ता चिरसमुदयाल्लोहिताया लताया
मेरुं मूर्ध्नि त्रिभुवनधुराधारधीरं निधत्ते ॥ १०० ॥

वैदर्भीव प्रमदकलिविश्लेषिता नैषधेशं
संपन्माद्यद्यशमुखहृता राघवं जानकीव ।
अक्रूरेणासमयरिपुणा लुठिताशेषसौख्या
सख्यास्ते नः सततमनुनापेक्ष्य सर्वात्मना त्वाम् ॥ १०१ ॥

प्रागेकस्य प्रियतम तव प्रेक्ष्य रूपं मृगाक्षी
सोत्कण्ठाभून्मदनकलुषा त्वत्परीरम्भलाभम् ।
विश्वं संप्रत्ययि दिशि दिशि त्वन्मयं दृश्यमानं
सैवं मग्नानवधिविरहे किन्तु वर्त्तेत भूयः ॥ १०२ ॥

एषा दोषान्तरजनगतिर्वेश्मनो यत्कथंचि-
न्नो निर्यायादिति पुरवधू नाथ निर्वारितापि ।
यावद्वृन्दावनमुपगता त्वद्वपुस्तादृशी सा
तावद्राधापदमविषयं भूतले साधु विद्मः ॥ १०३ ॥

सा ते कान्ता सदयसदसत्संशयाभासदेहं
शीर्णा शेते प्रियतमसखीमण्डली यां शृणोति ।
नासारन्ध्रान्तरविनिहिता सूक्ष्मतूलाणु किंचित्
कम्पासम्पादितजननया जीवतीत्याशयेव ॥ १०४ ॥

संजानीमो नियतमधुना त्वत्प्रियां तां धुरीणां
धन्यानां ते दयितचरणाम्भोजसम्पन्नसेवाम् ।
अद्य श्वो वा यदियमसुभिस्त्वां समेष्यत्यवश्यं
ध्यायन्नग्रे[1] सहचरि चिदानन्दमापद्विमुक्ता ॥ १०५ ॥

अस्मानश्मा सरसहृदया धिग्हरिण्यामगुण्याः
सख्या सौख्यास्पदविरहिता हृद्यया यत्त्वया च ।
आर्त्ता मत्वा क्षणमपि परं विश्वसृक्कल्पकल्पं
यास्यामोऽस्या वयमपि गतिं हन्त पश्चाद्विपन्नाः ॥ १०६ ॥

एषा तस्याः वचनरचना चारुपूर्णानुकम्पा-
पारावारप्रवणजगदाधारधीरन्ववेदि ।
तां मज्जन्तीं व्रजभुवमिति प्रोत्छलद्दुः खसिन्धौ
पोताय स्वेच्छसि यदि समुद्धर्त्तुमद्यापि भूमन् ॥ १०७ ॥

एतद्भृङ्गारमणचरणाम्भोजपीठीसमीपे
श्रीकंसारेरमरपटलीमौलिमालापरागे ।
आवेद्य त्वं कुसुमितवनेष्वात्महृद्येषु नित्यं
सौम्यायुष्मान् सहदयितया स्वरमित्थं रमस्व ॥ १०८ ॥

॥ इति श्रीभृङ्गदूतकाव्यं समाप्तम् ॥

॥ श्रीराधाकान्तश्रीचरणपङ्कजे मनो मे भृङ्गायतां नित्यम् ॥

# श्लोकानुक्रमणिका